

श्रीकृष्णचैतन्यः



श्रीनिम्बार्काचार्यः



श्रीहितहरिवंशः




श्रीवल्लभाचार्यः



श्रीमध्वाचार्यः



श्रीरामानन्दाचार्यः



श्रीकृष्णप्रेमिमहाराजः



श्रीरामानुजः



श्रीज्ञानेश्वरः



श्रीशङ्कराचार्यः



श्रीराजगोपालदेशिकः

आचार्येष्वपि सर्वेषु तारतम्यं विना कलौ ।<br>
शुद्धं भागवतं धर्मं जग्राह प्रेमिकं गुरुः ॥

नन्दसूनुं राधिकां च भावयन्तं सदा हृदि ।<br>
वन्देहं गुरुदेवं तं कृष्णप्रेमरसप्रदम् ॥

# श्रीवैष्णवसंहिता ध्यान श्लोकाः

नमो नमः सद्गुरुभ्यो सद्गुरुभ्यो नमो नमः ।
नमो नमः सद्गुरुभ्यो सद्गुरुभ्यो नमो नमः ॥

ज्ञान वैराग्य संपूर्णान् हरि भक्ति परायणान् ।
पूर्वाचार्यानहं वन्दे संप्रदाय प्रवर्तकान् ॥

कलि कालोचितं धर्मं नाम सङ्कीर्तनात्मकम् ।
निर्णेतुं अवतीर्णं तं प्रेमिकं सद्गुरुं भजे ॥

प्रह्लाद नारद पराशर पुण्डरीक
व्यासाम्बरीष शुक शौनक भीष्मदाल्भ्याम् ।
रुक्माङ्गदार्जुन वसिष्ठ विभीषणादीन्
पुण्यानिमां परम भागवतान् स्मरामि ॥

हरेर्नामैव नामैव नामैव मम जीवनम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥

नामसङ्कीर्तनं यस्य सर्व पाप प्रणाशनम् ।
प्रणामो दु:खशमन: तं नमामि हरिं परम् ॥

स्मृते सकलकल्याण भाजनं यत्र जायते ।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥

राधिकाकुचकस्तूरी कुङ्कुमाङ्कितवक्षसम् ।
श्रृङ्गाररसमूर्तिं तं भक्तकोलाहलं भजे ॥

